संस्कृत-वार्ता:

02.05.2025

सायम् - 06:20

**मुख्यवार्ता:**

· प्रधानमन्त्री नरेन्द्रमोदी अद्य आन्ध्रप्रदेशे विविधानाम् विकासयोजनानां शिलान्यासम् उद्घाटनं च अकरोत्।

· प्रधानमन्त्री-नरेन्द्रमोदी विझिंनजाम अन्ताराष्ट्रिय-डीपवाटर-मल्टीपर्पज-जलपोतस्थानकं राष्ट्राय समर्पितवान्।

· रेडियो रीयमेजिन्ड: थ्राइविंग इन द डिजिटल एज अस्य विषयस्योपरि अद्य मुंबईय्यां पञ्चविंशत्यधिक-द्विसहस्रतमे वेव्ससम्मेलने वैश्विक-विशेषज्ञैः व्यावहारिक-चर्चायां भागं स्वीकृतम्।

· अङ्गोलादेशस्य राष्ट्रपतिः जोआओ मैनुअल् गोन्साल्विस् लौरेन्को अद्य प्रातःकाले भारतस्य त्रिदिवसीयराजकीययात्रायां नवदिल्ल्यां सम्प्राप्तवान्।

· आई.पी.एल्. इत्येतस्यां विंशतिप्रति विंशति- क्रिकेट- स्पर्धा- मालिकायाम् अद्य गुजरातस्य नरेन्द्रमोदी-क्रीडाङ्गणे गुजरात-टायट्न्स-दलम् सनराइजर्स-हैदराबाद-दलम् सम्मुखीकरिष्यति।

**पीएम - आन्ध्र प्रदेश**

प्रधानमन्त्री नरेन्द्रमोदी आन्ध्रप्रदेशस्य राजधान्याम् अमरावत्यां निर्माणकार्याणां पुनः आरम्भस्य आधारशिलाम् अस्थापयत्, अष्ट पञ्चाशत्सहस्र कोटिरूप्यकाणां च विभिन्नानां मार्ग-रेल-परियोजनानां उद्घाटनं कृतवान्। सभां सम्बोधयन् प्रधानमन्त्रिणा उक्तं यत् एताः परियोजनाः आन्ध्रप्रदेशस्य आकांक्षाणां विकसितभारतस्य च आशानां दृढं आधारं निर्मान्ति। सः अवदत् यत् विगतदशवर्षेषु देशे भौतिक-अङ्कीय-सामाजिक आधारभूत-संरचनासु बहुधा ध्यानं दत्तम् अस्ति। मोदीमहोदयः अपि अवदत् यत् भारतं तेषु राष्ट्रेषु अन्यतमः अस्ति येषां आधारभूतसंरचना तीव्रगत्या विकसिता भवति।

**प्रधानमन्त्री-केरल:**

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् भारतस्य तटीयराज्यानि भारतस्य विकासे प्रमुखकेन्द्राणि भविष्यन्ति। प्रधानमन्त्री-नरेन्द्रमोदी विझिंनजाम अन्ताराष्ट्रिय-डीपवाटर-मल्टीपर्पज-जलपोतस्थानकं राष्ट्राय समर्पितवान्, एतद्देशस्य प्रथमं अर्ध-स्वचालित-जलपोतस्थानकं वर्तते। कार्यक्रमेऽस्मिन् प्रधानमन्त्रिणा प्रोक्तं यत् भारतस्य सामुद्रिकाधारस्य विकासाय अयं महत्त्वपूर्ण-पदक्षेपः वर्तते। तेनोदीरितं यत् विझिंनजाम-जलपोताश्रयः नवीनयुगस्य विकासाय श्रेष्ठप्रतिमानमस्ति। अनेन देशः केरलराज्यञ्च आर्थिक-स्थिरतां प्राप्स्यति।

अष्टशताधिक-अष्टसहस्रकोटिरुप्यात्मकः विझिंनजाम-जलपोताश्रयः विश्वस्य वस्तुवाहक-जलपोतानाम् आगमनं सरलीकरोति। प्रधानमन्त्रिणा समुद्घोषितं यत् विझिंनजाम-जलपोताश्रये पोतान्तरणं भविष्ये त्रिगुणितं समेधिष्यते। प्रधानमन्त्रिणा जलपोताश्रये सञ्चालनभवनस्य नियन्त्रण-प्रणालीनाञ्च निरीक्षणं विहितम्।

कार्यक्रमं सम्बोधयन् केरलस्य मुख्यमन्त्री पिनाराई-विजयन इत्येषः प्रोक्तवान् यत् विझिंनजाम-जलपोताश्रयेण तृतीय-सहस्राब्दस्य विकाससम्भावनायै प्रवेशद्वारः समुद्घाटितः।

## वेव्स-रेडियो

रेडियो रीयमेजिन्ड: थ्राइविंग इन द डिजिटल एज अस्य विषयस्योपरि अद्य मुंबईय्यां पञ्चविंशत्यधिक-द्विसहस्त्रतमे वेव्ससम्मेलने वैश्विक-विशेषज्ञैः व्यावहारिक-चर्चायां भागं स्वीकृतम्। चर्चायामस्यां भागग्रहणं कुर्वता

प्रसारभारत्याः पूर्व-सीईओ शशि-शेखर- वेम्पट्टी इत्यमुना प्रोदीरितं यत् भारतं रेडियो इत्यस्य कृते बृहत्तमं आपणमस्ति।

साम्प्रतं वयं स्वकीय-संवदात्रा दीपेन्द्र इत्यमुना सह अधिकविवरणार्थं वार्तां साधयामः।

**प्र. दीपेन्द्र, अद्य शिखरसम्मेलनानां विशेषतः वेव्स-घोषणापत्राणां स्वीकरणानन्तरं निष्कर्षः मुख्यबिन्दवश्च के सन्ति।**

**लाइव-दीपेन्द्र**

**अधिकविवरणाय धन्यवाद: दीपेन्द्र महोदयाय।**

## वेव्स-वैश्विक-मीडिया-संवादः

अद्य प्रातः मुंबईय्याः जियो-वर्ल्ड कन्वेंशन-सेंटर इत्यत्र वेव्स इत्युपवेशनान्तर्गतं वैश्विक-मीडिया-संवादः समारब्धः। अयं कार्यक्रमः वैश्विक-संचारमाध्यमिकैः मनोरञ्जन-परिदृश्यैः सह देशस्य संयोजने महत्वपूर्णभूमिकां आविष्करिष्यति। गतदिने समारब्धस्य चतुर्दिवसीय-शिखरसम्मेलनस्य उद्घाटनं प्रधानमन्त्रिणा नरेन्द्रमोदिना विहितम्। वैश्विक-मीडिया-संवादः सूचना-प्रसारण-मन्त्रालयेन विदेशमन्त्रालयस्य सहयोगेन समाचर्य्यते। उद्घाटनसत्रे विदेशमन्त्रिणा डॉ. एस. जयशङ्करेण कथितं यत् प्रौद्यौगिकी परम्परया सह गच्छेदिति। डॉ. जयशङ्करेण प्रोक्तं यत् सप्तचत्त्वारिंशदधिक-द्विसहस्त्रतमं यावत् भारतस्य विकसितराष्ट्रस्वप्नः प्रौद्योगिक्या प्रेरितं स्यात्, परञ्च सः सांस्कृतिक-स्वरुपात्मकः भवेत्। अवसरेऽस्मिन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् वैश्विकस्तरे संचारमाध्यमम् इत्यस्य मनोरञ्जनोद्योगस्य च मूल्यं ट्रिलियनत्रयं अमेरिकी-डॉलरमितात्मकं वर्तते। कार्यक्रमेऽस्मिन् षष्ट्यधिकदेशाः संयुक्ताः सन्ति ।

## अङ्गोलाराष्ट्रपतिः

अङ्गोलादेशस्य राष्ट्रपतिः जोआओ मैनुअल् गोन्साल्विस् लौरेन्को अद्य प्रातःकाले भारतस्य त्रिदिवसीयराजकीययात्रायां नवदिल्ल्यां सम्प्राप्तवान्। तस्य विशिष्टस्वागतम् अभवत् विदेशराज्यमन्त्री कीर्तिवर्धनसिंहेन विमानस्थानके तस्य स्वागतं कृतम्। श्री लॉरेन्को इत्यनेन सह उच्चस्तरीयः प्रतिनिधिमण्डलः अपि आगतः, यस्मिन् नैके मन्त्रिणः, वरिष्ठाधिकारिणः, व्यापारिणः, वार्ताहराः च सन्ति। अङ्गोलादेशस्य कस्यापि राष्ट्रपतेः भारतयात्रा अष्टत्रिंशत् वर्षाणाम् अनन्तरं भवति।

## राष्ट्रियमानवाधिकारायोग-केरल

राष्ट्रियमानवाधिकारायोगेन केरलस्य कारागृह-महानिदेशकाय राज्यस्य कारागृहेषु बन्धकान् शिक्षां प्रदाने आवश्यकाधारभूतसंरचनायाः, जनशक्तेः च अभावस्य विषयेसूचना प्रसारितास्ति। सुओ मोतु इति स्वतः संज्ञानाधारेण आयोगेन वार्ता वाहिन्यानां प्रतिवेदनानि आधारितम्। गम्भीरापराधेषु निगडिताः बन्धिनः वर्धमाना संख्या नियमितरूपेण आभासीय माध्यमेन वा शैक्षिककार्यक्रमेषु नामाङ्कनं कृत्वा स्वजीवने सुधारं कर्तुं विकल्पं चिन्वन्ति। आयोगेन चतुर्सप्ताहं यावत् केरलस्य कारागृहस्य महा निदेशकात् विस्तृतं प्रतिवेदनं याचितम्।

## शेखावत-सम्मेलनम्

केन्द्रिय-संस्कृति-पर्यटनमन्त्री गजेन्द्र-सिंह- शेखावतः अद्य नवदिल्ल्याः भारतमण्डपम् इत्यत्र चतुर्दशतमस्य सम्मेलनस्य उद्घाटनम् अकरोत् । अवसरेऽस्मिन श्री शेखावतेन उक्तं यत् देशेन विगतदशके प्रत्येकस्मिन् क्षेत्रे विकासः अनुभूतः। मन्त्रिणा सबलं प्रतिपादितं यत् भारतस्य पार्श्वे उत्तम-क्षमता, आवश्यकाधारः, दृढापणश्च वर्तते येनात्र अभूतपूर्व-सम्भावनाः समुत्पद्यन्ते।

## ऋतुविभागः

भारतर्तुविज्ञानविभागेन-आईएमडी इत्यनेन राष्ट्रियराजधानीयाः कृते आगामिदिनद्वयोः प्रचण्डवृष्ट्याः, तीव्रवायोः च पीतवार्णिकी सन्चेतना प्रसारितास्ति। आकाशवाण्या सह वार्तालापं कुर्वन् ऋतुविभागस्य महानिदेशकः डॉ. मृत्युञ्जयमहापात्रा अवदत् यत्, आगामि द्वि-त्रि-दिवसावधौ देशस्य उत्तरे, उत्तर-पश्चिमीय, पूर्वोत्तरक्षेत्रेषु चापि एतादृशः परिस्थितयः अपेक्षिताः सन्ति।

## आईपीएल

आई.पी.एल्. इत्येतस्यां विंशतिप्रति विंशति- क्रिकेट- स्पर्धा- मालिकायाम् अद्य गुजरातस्य नरेन्द्रमोदी-क्रीडाङ्गणे गुजरात-टायट्न्स-दलम् सनराइजर्स-हैदराबाद-दलम् सम्मुखीकरिष्यति। क्रीडैषा सायं सार्धसप्तवादनतो क्रीडिष्यति। ह्यः रात्रौ क्रीडिते द्वन्द्वे जयपुरस्य सवाईमानसिंह-क्रीडाङ्गणे मुम्बई-इण्डियनस्य-दलेन राजस्थान-रॉयल्स-दलं शतधावनाङ्कैः पराजितम्।

## महाराष्ट्र-एनएसईवेव्ससूची

नेशनल-स्टॉक-एक्सचेंज इत्यनेनाद्य निफ्टी-वेव्स-सूचिः समुद्घाटिता। मीडियायाः मनोरञ्जनक्षेत्रस्य च आहत्य त्रिचत्त्वारिंशत् समवायाः एतस्याः अनुक्रमणिकायाः अंशाः भविष्यन्ति। अवसरेऽस्मिन् महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र-फडणवीसः एनएसई इत्यस्य एमडी एवं सीईओ आशीष-कुमार-चौहानः उपस्थिताः आसन्। महाराष्ट्र-सर्वकारेण अद्य केषुचित् सन्धिपत्रेषु हस्ताक्षरमपि विहितम्। सन्धिविषये प्रवदन्

श्रीफडणवीसः विज्ञापितवान् यत् भारते कथावाचनस्य बृहत्तम-परम्परा वर्तते एवं एताभिः सन्धिभिः परम्परामिमां विश्वस्मिन् प्रसारयितुं साहाय्यं लप्स्यते। महाराष्ट्र-सर्वकारेण अत्याधुनिक-आर्टिफिशियल-इंटेलिजेंस-स्टूडियो इत्यस्य स्थापनार्थं गोदरेज़-समवायेन सह साथ एकस्मिन् सन्धिपत्रे हस्ताक्षरमपि कृतम्। गोदरेज-समवायः चरणद्वयेषु आहत्य द्विसहस्त्र-कोटिरुप्यकाणां निवेशः विधास्यति येन पञ्चविंशति-शतं युवानः आजीविकां प्राप्स्यन्ति।

।। इति वार्ता ।।